**CLASS : 10th (Secondary)** **Code No. 1139**

**Series : Sec/Annual Exam.-2024**

*रोल नं०* | | | | | | | | | | |

# पूर्व मध्यमा सह माध्यमिक परीक्षा संस्कृत साहित्य (आर्ष पद्धति गुरुकुल)

**Sub. Code : 1001/SKS**

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **7** तथा प्रश्न **9** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*

- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशाः* -(क) ***सर्वे प्रश्नाः समाधेयाः।***

(ख) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(ग) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(घ) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

## खण्डः 'क'

## (बहुविकल्पीयाः प्रश्नाः)

**1.** अधोविन्यस्तानामेकं समीचीनमुत्तरं विचित्य लिखत – $1 \times 16 = 16$

(i) एकत्रिंशाध्यायस्य द्वितीयः मन्त्रः कः ?

(क) एतावानस्य महिमातो०
(ख) पुरुष एवेदं सर्वम्०
(ग) ततो विराऽजायत०
(घ) तदेवाग्निः०

(ii) ''न तस्य प्रतिमास्ति'' इति मन्त्रस्य का देवता ?

(क) आत्मा
(ख) हिरण्यगर्भः परमात्मा
(ग) परमेश्वरः
(घ) परमात्मा

(iii) 'सहस्रशीर्षा' इति कस्य विशेषणम् ?

(क) जीवात्मनः
(ख) पुरुषस्य
(ग) विष्णोः
(घ) इन्द्रस्य

(iv) वैदिकगीतायाः प्रथमाध्यायस्य नाम किम् ?

(क) अर्जुनविषादयोगः
(ख) भक्तियोगः
(ग) कर्मयोगः
(घ) सांख्ययोगः

(v) 'चमूः' इति पदं कस्मिन् लिङ्गे ?

(क) पुंसि
(ख) स्त्रियाम्
(ग) क्लीबे
(घ) पुंसि क्लीबे च

(vi) ''देही नित्यम् ................ अयं देहे सर्वस्य भारत'' अत्र रिक्तस्थानं पूरयत।

(क) व्यक्तम्
(ख) देहे
(ग) अवध्यः
(घ) अव्यक्तम्

(vii) 'स्वधा' इति पदस्य योगे का विभक्तिर्भवति ?

(क) चतुर्थी
(ख) षष्ठी
(ग) पञ्चमी
(घ) तृतीया

(viii) सीता .......... अधिशेते। (रिक्तस्थानं पूरयत)

(क) भूमौ　　(ख) आसने

(ग) भूमिः　　(घ) भूमिम्

(ix) वानप्रस्थी स्वभार्यां –

(क) सहैव नयेत्　　(ख) पुत्रेषु निक्षिपेत्

(ग) उभयं साधु　　(घ) किमपि न कुर्यात्

(x) ''वेदान्तविज्ञानसुनिश्चितार्थाः०'' इति मन्त्रः कुतं उद्धृतः ?

(क) कठोपनिषदः　　(ख) केनोपनिषदः

(ग) छान्दोग्योपनिषदः　　(घ) मुण्डकोपनिषदः

(xi) धातूनां मलाः केन दह्यन्ते ?

(क) तापेन　　(ख) मनसा

(ग) ध्मायमानेन　　(घ) कर्मणा

(xii) कुत्र चतुर्थी विभक्तिर्भवति ?

(क) अधि　　(ख) सर्वतः

(ग) परितः　　(घ) हितः

(xiii) द्वन्द्वसमासे कः पदप्रधानो भवति ?

(क) अन्यपदप्रधानः　　(ख) पूर्वपदप्रधानः

(ग) उभयपदप्रधानः　　(घ) उत्तरपदप्रधानः

(xiv) वित्तस्य कियत्यो गतयो भवन्ति ?

(क) षड्    (ख) तिस्रः

(ग) चतस्रः    (घ) पञ्च

(xv) सम्पदां मूलं किं भवति ?

(क) स्नेहः    (ख) धनम्

(ग) उत्तमव्यवहारः    (घ) विश्वासः

(xvi) 'अर्थिषु' इति पदं कस्मिन्नर्थे ?

(क) धनेषु    (ख) प्रयोजनेषु

(ग) याचकेषु    (घ) दानेषु

**खण्डः 'ख'**

**(अतिलघूत्तरीयाः प्रश्नाः)**

**2.** अधस्तनानां गद्यभागानां हिन्दीभाषयार्थो विधीयताम् — $2 \times 4 = 8$

(क) स आह - ''श्रूयताम् ! अत्र देशे महत्यानावृष्ट्या दुर्भिक्षं सञ्जातम्। दुर्भिक्षत्याज्जनो बुभुक्षापीडितः कोऽपि बलिमात्रमपि न प्रयच्छति। अपरं, गृहे-गृहे बुभुक्षितजनैर्विहङ्गानां बन्धनाय पाशाः प्रगुणीकृताः सन्ति।

(ख) आह – ''ब्राह्मणि ! प्रभाते दक्षिणायनसंक्रान्तिरनन्तदानफलदा भविष्यति। तदहं प्रतिग्रहार्थं ग्रामान्तरं यास्यामि। त्वया ब्राह्मणस्यैकस्य भगवतः सूर्यस्योद्देशेन किञ्चिद्भोजनं दात्तव्यम्'' इति।

(ग) ''मातः। अग्राह्याः खल्विमे तिलाः। नास्या अलुञ्चितैर्लुञ्चिता ग्राह्याः। करणं किञ्चिद् भविष्यति, येनैषालुञ्चितैलुञ्चितान् प्रयच्छति।'' तच्छ्रुत्वा तया परित्यक्तास्ते तिलाः। अतोऽहं ब्रवीमि - ''नाकस्माच्छाण्डिली मातः'' इति।

(घ) चित्रग्रीवोऽपि लुब्धकमदर्शनीभूतं ज्ञात्वा तानुवाच – ''भोः ! निवृत्तः स दुरात्मा लुब्धकः तत्सर्वैरपि स्वस्थैर्गम्यतां महिलारोप्यस्य प्रागुत्तरदिग्भागे। तत्र मम सुहृद्धिरण्यको नाम मूषकः सर्वेषां पाशच्छेदं करिष्यति।

**3.** निम्नलिखितानां पद्यानां हिन्द्यामर्थं कुरुत – $2 \times 3 = 6$

(क) नह्यतो धर्मचरणं किञ्चिदस्ति महत्तरम्।

यथा पितरि शुश्रूषा तस्य वा वचनक्रिया।।

(ख) शोकरातिभयत्राणं प्रीतिविश्वासभाजनम्।

केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम्।।

(ग) आसीद्भागीरथ्यास्तीरे कश्चिन्महान्पर्कटीवृक्षः। तस्य कोटरे वृद्धत्वाद् गलितनखो विनष्टदृष्टिर्जरद्गवो नाम गृध्रः प्रत्यवसत्।

**4.** अधोलिखितानां मन्त्राणां पूर्तिं विधेहि — $2 \times 3 = 6$

(क) एतावानस्य ............. ।

(ख) स नो बन्धुर्जनिता ............. ।

(ग) इदं मे ब्रह्म च क्षत्रं ............. ।

**खण्डः 'ग'**

**(लघूत्तरीयाः प्रश्नाः)**

**5.** निम्नाङ्कितानां श्लोकानां सप्रसङ्गं व्याख्यां कुरुत — $4 \times 3 = 12$

(क) व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।

बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्।।

(ख) भीष्मद्रोणप्रमुखतः सर्वेषाञ्च महीक्षिताम्।

उवाच पार्थ पश्यैतान् समवेतान् कुरुनिति।।

(ग) सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।

ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि।।

**6.** अधस्तनं ***प्रश्नद्वयमपि*** समाधीयताम् — 4 × 2 = 8

(क) वानप्रस्थस्य कालं वानप्रस्थिनः कर्त्तव्यानि च संक्षेपेण लिखत।

(ख) पञ्चमसमुल्लासे संन्यासिनां के-के धर्माः वर्णिताः ? संक्षेपेण व्याख्याहि।

**खण्डः 'घ'**

**(निबन्धात्मकप्रश्नाः)**

**7.** मन्त्र***द्वयस्य*** सप्रसङ्गं व्याख्यां कुरुत — 6 × 2 = 12

(क) सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि।

नैनमूर्द्धवं न तिर्य्यञ्चं न मध्ये परि जग्रभत्।।

**अथवा**

नाभ्याऽआसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्त्तत्।

पद्भयां भूमिर्दिशः श्रोत्रात्तथा लोकांऽअकल्पयन्।।

(ख) यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।

मुखं किमस्यासीत्किं बाहू किमूरु पादाऽउच्येते।।

**अथवा**

येन द्यौरुग्रा पृथिवी च दृढा येन स्वस्तभितं येन नाकः।

योऽन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम।।

**8.** वैदिकगीतायाः द्वितीयस्य ***अथवा*** प्रथमस्य अध्यायस्य सारं लिखत। $6 \times 1 = 6$

**9.** पञ्चतन्त्रानुसारं "हिरण्यकताम्रचूडकथायाः" ***अथवा*** "मन्दभाग्यसोमिलकथायाः" सारः संक्षेपेण लिख्यताम्। $6 \times 1 = 6$